
पञ्चमः पाठः ५

# नित्यं कर्तव्यम्
## (क्त्वा ल्यप् च)

(पाठेऽस्मिन् बालकस्य नित्यक्रियायाः वर्णनमस्ति। सः प्रतिदिनं किं-किं करोति? आगच्छन्तु वयं गीतमाध्यमेन पठामः।)







प्रातः काले ईशं स्मृत्वा, पितरौ प्रणमामि।
नित्यं कर्म च कृत्वोद्यानं, गत्वा विचरामि ।।1।।

स्नानात् पूर्वं प्राणायामं, तदनु व्यायामम्।
वृष्टिर्भवतु वा झञ्झावातो, हिमं पतेत् कामम् ।।2।।

गृहमागत्य दुग्धं पीत्वा, पठामि निजपाठम्।
ततो भोजनं करोमि नित्यं, षड्रससंयुक्तम् ।।3।।

विद्यालये च गुरुवर्याणां, करोमि सम्मानम्।
श्रद्धायुक्तो भूत्वैवाहम्, अर्जयामि ज्ञानम् ।।4।।


सायङ्काले क्रीडाक्षेत्रे, गत्वा क्रीडामि।
देवदर्शनं ततो भोजनं, पाठं स्मरामि ।।5।।

शयनात् पूर्वं राष्ट्रचिन्तनं, नित्यं कर्तव्यम्।
भारतमातुः दिव्यमन्दिरं, भवतु पुनः भव्यम् ।।6।।

( परमानन्द शर्मा "प्रमोदः" )







## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| ईशम् | देवम् | ईश्वर को |
| स्मृत्वा | स्मरणं कृत्वा | स्मरण करके |
| पितरौ | जनकं जननीं च | माता–पिता को |
| उद्यानम् | वाटिका | बगीचा |
| तदनु | तत्पश्चात् | इसके बाद |
| झञ्झावातः | चक्रवातः | तूफान |
| कामम् | यद्यपि | भले हि |
| आगत्य | आगमनं कृत्वा | आकर |
| नित्यम् | सदैव | सर्वदा |
| भारतमातुः | भारतजनन्याः | भारत माता का |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

प्रातःकाले, स्मृत्वा, कृत्वोद्यानम्, व्यायामम्, झञ्झावातः,
गृहमागत्य, भूत्वैवाहम्, देवदर्शनम्, भव्यम् सायङ्काले

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) बालः कुत्र गत्वा विचरति ?

(ख) सः प्रातःकाले कं स्मरति ?

(ग) सः गृहम् आगत्य किं पिबति ?

(घ) आदर्शबालः केषां सम्मानं करोति ?

(ङ) बालाः कुत्र क्रीडन्ति ?

**३. कोष्ठकात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत -**

(क) अहम् ------------- पूर्वं व्यायामं करोमि। (भोजनात्/स्नानात्/अध्ययनात्)

(ख) अहं गृहम् आगत्य दुग्धं पीत्वा ------ पठामि। (पत्रिकाम्/दैनन्दिनम्/स्वपाठम्)

(ग) छात्रः विद्यालये ------------- अर्जयति। (धनम्/बुद्धिम्/ज्ञानम्)

(घ) नित्यं ----------- कर्तव्यम्। (गृहचिन्तनम्/राष्ट्रचिन्तनम्/स्वचिन्तनम्)

**४. निम्नाङ्कितपदानां संयोजनं कुरुत -**

| | (क) | | (ख) |
|---|---|---|---|
| (क) | पितरौ | - | पतेत् |
| (ख) | वृष्टिः | - | करोमि |
| (ग) | निजपाठम् | - | अर्जयामि |
| (घ) | हिमम् | - | प्रणमामि |
| (ङ) | सम्मानम् | - | भवतु |
| (च) | ज्ञानम् | - | पठामि |

**५. निम्नलिखितपदेषु सन्धिं कृत्वा लिखत -**

(क) कृत्वा + उद्यानम् ------------

(ख) वृष्टिः + भवतु ------------

(ग) भूत्वा + एव + अहम् ------------

(घ) गृहम् + आगत्य ------------

**६. निम्नलिखितपदानां विभक्तिं वचनं च लिखत -**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | प्रातःकाले | ---------- | ------------ |
| (ख) | व्यायामम् | ---------- | ------------ |
| (ग) | भारतमातुः | ---------- | ------------ |
| (घ) | शयनात् | ---------- | ------------ |
| (ङ) | क्रीडाक्षेत्रे | ---------- | ------------ |

७. **वाक्यानि संयोज्य लिखत –**

**यथा** – रमा उद्यानं **गच्छति**। पाठं पठति। रमा उद्यानं **गत्वा** पाठं पठति।

(क) भगिनी पाठं **पठति**। गृहकार्यं करोति। ------------------।

(ख) माता पूजां **करोति**। कार्यालयं गच्छति। ------------------।

(ग) पर्यटकः हवामहलं **पश्यति**। आनन्दितः भवति। ------------------।

(घ) अहं संस्कृतवार्तां **शृणोमि**। ज्ञानं वर्धयामि। ------------------।

(ङ) मृगः नदीं **गच्छति**। जलं पिबति। ------------------।

८. **रेखाङ्कितपदे ल्यप् प्रत्ययं प्रयुज्य वाक्यानि लिखत –**

(क) बालकः उत्तिष्ठति धावति। ------------------।

(ख) वयं देवं नमस्कुर्मः कार्यारम्भं कुर्मः। ------------------।

(ग) वयं सम्मिलामः वार्तालापं कुर्मः। ------------------।

(घ) गीता पाठं लिखति पठति। ------------------।

## योग्यता-विस्तारः

१. **एतदपि जानीत –**

- यदा धातोः पूर्वम् उपसर्गः शब्दः वा भवति तदा क्त्वा स्थाने ल्यप् भवति।

| | | |
|---|---|---|
| प्रक्षालयति | प्रक्षाल्य | प्र + क्षाल् + ल्यप् |
| उत्तिष्ठति | उत्थाय | उत् + स्था + ल्यप् |
| उपविशति | उपविश्य | उप + विश् + ल्यप् |

- अत्र प्र , उत् , उप इति उपसर्गाः सन्ति।

| | | |
|---|---|---|
| नमस्करोति | नमस्कृत्य | नमः + कृ+ ल्यप् |
| अलङ्करोति | अलङ् कृत्य | अलम् + कृ + ल्यप् |

- अत्र नमः, अलम् द्वौ अपि शब्दौ स्तः।

२. क्त्वा ल्यप् प्रत्ययोः रूपाणाम् अभ्यासं कुरूत –


यथा – बालिका विद्यालयं गच्छति।



बालिका पाठं पठति।



बालिका विद्यालयं गत्वा पाठं पठति।



| वर्तमानकालिकरूपम् | क्त्वा–प्रत्ययान्तरूपम् | प्रकृतिः + प्रत्ययः |
|---|---|---|
| पठति | पठित्वा | पठ् + क्त्वा |
| लिखति | लिखित्वा | लिख् + क्त्वा |
| खादति | खादित्वा | खाद् + क्त्वा |
| पतति | पतित्वा | पत् + क्त्वा |
| क्रीडति | क्रीडित्वा | क्रीड् + क्त्वा |
| मिलति | मिलित्वा | मिल् + क्त्वा |
| नयति | नीत्वा | नी + क्त्वा |
| भवति | भूत्वा | भू + क्त्वा |
| करोति | कृत्वा | कृ + क्त्वा |
| चिनोति | चित्वा | चि + क्त्वा |
| श्रृणोति | श्रुत्वा | श्रु+ क्त्वा |
| पश्यति | दृष्ट्वा | दृश्+ क्त्वा |
| पिबति | पीत्वा | पा+ क्त्वा |
| ददाति | दत्त्वा | दा + क्त्वा |

३.



अहं प्रभाते उतिष्ठामि
माता पितरौ प्रणमामि।
देवान् भक्तवरेण्यान् नत्वा
पठने मतिं विधास्यामि ।।१।।

विना विलम्बं शाला गच्छन्
पाठ्यांशान् अवगच्छामि।
सर्वान् विषयान् सम्यगधीत्य
बुद्धि विशदतां प्राप्नोमि ।।२।।

शिष्टाचारान् साधुविचारान्
बुद्धिकरान् आकलयामि।
विद्याभ्यासाचारविचारैः
सर्वश्रेष्ठतां विन्दामि ।।३।।

(श्री जनार्दन हेगडे)

**अध्यापकाय निर्देशः -**

। शिक्षकः कक्षायाम् अस्य गीतस्य अभ्यासं कारयेत्।